
# ત્રયી ચિંતન

## સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

**PART - I**




PRINCIPAL

| | | |
|---|---|---|
| 63 | "ગીતામાં – ભકત મનની વિભાવના ડૉ. હર્ષા એમ. મદલાણી શ્રી કે. એચ. માધવાણી આર્ટસ્ એન્ડ કોમર્સ કોલેજ, પોરબંદર | 149 |
| 64 | યોગ અને મનોવિજ્ઞાન સરયુ જી. સધરાકિયા યુ. કે. વાછાણી મહિલા આર્ટસ એન્ડ હોમસાયન્સ કોલેજ,કેશોદ | 151 |
| 65 | "યોગ અને મનનો તુલનાત્મક અભ્યાસ" ડૉ. સ્મિતાબેન આચાર્ય ડૉ. વી. આર. ગોઢ ણીયા મહિલા કોલેજ, પોરબંદર | 155 |
| 66 | શ્રીમદ ભાગવદગીતામાં મન વિષયક નિરુપણ. પ્રો.ડો.રમેશ સાગઠિયા અને પ્રો.ડો.રેખાબેન ગુંજારિયા (શ્રી.ઘોડાસરા કોલેજ - જૂનાગઢ) | 157 |
| 67 | વેદ, ભગવદ્ ગીતા, ઉપનિષદોમાં મન અંગેના વિચારો ડૉ. આર. કે. જારસાણીયા એમ.વી.એમ. આર્ટ્સ કોલેજ રાજકોટ | 161 |
| 68 | 'સાંખ્યદર્શન'માં નિરુપિત મનનું સ્વરૂપ તથા કાર્ય પ્રા. નીતિનકુમાર જયંતિલાલ ગામીત આર્ટસ અને કોમર્સ કૉલેજ, બરવાળા, | 163 |
| 69 | '**स्वप्नवासवदत्तम्**માં મહાકવિ ભાસનો મનોવૈજ્ઞાનિક અભિગમ' C. B. RATHAVA | 167 |
| 70 | સંસ્કૃતિ ઉદ્દગાતા નાટયકાર કાલિદાસ ડો. મસરીભાઈ ભીમસીભાઈ સોલંકી / શ્રીમતી વનિતાબેન ભીમસીભાઈ કરંગીયા મહિલા આર્ટસ એન્ડ કોમર્સ કોલેજ–વેરાવળ. | 169 |
| 71 | શ્રીમદ્ ભગવદગીતામાં મન અંગેના વિચારો ડો. વિ. એસ. ઝાલા મહિલા કોલેજ વેરાવળ | 171 |
| 72 | योग और मनोविज्ञान डॉ. परिहार उर्मिला व्याख्याता – इतिहास, राजकिय महाविद्यालय, शिवगंज (सिरोही) | 174 |
| 73 | उपनिषद् में निहित मनोविज्ञान डॉ. परेश जे. गजेरा श्री डी.के.कपुरिया आर्ट्स एन्ड श्रीमती एस.बी.गार्डी कोमर्स कोलेज, कालावड़, | 178 |
| 74 | **संस्कृत वाडँगमये शिवतत्वम अंतरगत यजुर्वेदे शिवतत्वविस्तुतिः प्रो, डो, जागृति बी जोषी संस्कृतविभागाध्यक्ष, आर्ट्स् ॲन्ड कामर्स कोलेज वलासिनोर , महिसागर।** | 180 |
| 75 | भगवद् गीता में मन का वर्णन प्रा. एम.जे रावल महिला आर्टस कामर्स कोलेज वेरावल | 183 |
| 76 | ॥ गीतायाः प्रथमेऽध्याये अर्जुनस्य मनोदशा भगवता कृतं मनोवैज्ञानिकं तत्समाधानम् ॥ डॉ.पङ्कजकुमार एस्. रावलः आसि.प्रोफेसर, श्रीसोमनाथसंस्कृतयुनिवर्सिटी संस्कृतकोलेज, वेरावल, गुजरात | 185 |
| 77 | ॥ संस्कृतवाङ्मये प्राणीमानसचिन्तनस्येषपरिचयः । डॉ. अमृतलाल भोगायता श्रीसोमनाथ संस्कृत युनिवर्सिटी वेरावल, | 188 |


Scanned with CamScanner

## ॥ गीतायाः प्रथमेऽध्याये अर्जुनस्य मनोदशा भगवता कृतं मनोवैज्ञानिकं तत्समाधानम् ॥

डॉ.पङ्कजकुमार एस्. रावलः
आसि.प्रोफेसर, श्रीसोमनाथसंस्कृतयुनिवर्सिटी संस्कृतकोलेज, वेरावल, गुजरात

**"यन्न भारते तन्न भारते" 'यदीहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्'** महाभारतस्य प्रसिद्धवाक्येषु द्वे वाक्ये स्तः। महाभारतस्थासु द्विचत्वारिंशत् (४२) गीतासु अनन्यतमा अन्यतमा वा गीता नाम श्रीमद्भगवद् गीता। या स्वयं पद्मनाभस्य श्रीमुखात् विनिर्गता। श्रीकृष्णेन गीता अर्जुनाय गीता अस्मभ्यं च गीता सैव श्रीमद्भगवद्गीता। अस्याः गीतायाः महत्त्वं तदर्थं विद्यते यत् एकं तु इयं कुरुक्षेत्रे गीता द्वितीयं स्वयं श्रीकृष्णेन गीता तृतीयं च तदपि एवमेव न गीता अपितु अर्जुनस्य मनोशारीरिकानि चिह्नानि वा दशाः दृष्ट्वा गीता। अत एव **'एकं शास्त्रं देवकीपुत्रगीतम्'**।

महाभारतस्य युद्धं भवतु वा अन्यद् युद्धं भवतु प्रथमं तद् युद्ध माध्यान्तर्जगति भवति ततश्च बाह्य जगति भवति। मानवस्यार्जुनमिव कुरुक्षेत्रे (संसारक्षेत्रे) यदा युद्धस्थितिः समुत्पन्ना भवति तदैव मनोशारीरिकचिह्नानि विपरीतानि भवति अत एव श्रीकृष्णेनार्जुनस्य मनोदशां विलोक्यं विज्ञानमेकमुद्घाटितं तदेव विज्ञानंमिदानीं संसारे धर्मग्रन्थेन विभूषितं श्रीमद्भगवद्गीता नाम्ना द्योत्यते प्रकाश्यते विलसति च।

गीता एकः मनोवैज्ञानिको ग्रन्थः। तत्र अर्जुनः मनोरुग्णः श्रीकृष्णः मनोचिकित्सकः तत्रापि सफलः परिणामः। "मनोविज्ञाने" द्वौ शब्दौ स्तः। मनः विज्ञानमर्थात् मनसः विज्ञानं मनसे विज्ञानं मनसि विज्ञानमिति। तत्र शास्त्रे मनसः द्वौ प्रकारौ विवर्णितौ तद्यथा-

**मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च।**
**अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम्॥ (विवेकधैर्याष्टकम्)**

विज्ञानं नाम विशिष्टं ज्ञानं, विशुद्धं ज्ञानमिति एतयोः समाहारेण गीतायाः प्रथमेऽध्यायेऽर्जुनः विषादग्रस्तः न तस्मिन् शारीरिकं चैतन्यं न च मनोबलं द्वाभ्यां मनोशरीराभ्यां निर्बलभूतोऽर्जुनः मनोरुग्णः प्रतिभाति। युद्धभूमौ अवतीर्य युद्धात् स्वक्षत्रियधर्मात् पलायितुं प्रार्थयति। श्रीकृष्णोऽपि मनोचिकित्सकः अत एव अर्जुनं विदित्वा तत्समाधानाय युद्धभूमौ गीतां गायति कारणं गीता शब्दस्य सोऽपि अर्थः यत् **"गीयते इति गीता"** यः युद्ध भूमौ गातुं शक्नुयात् स युद्धभूमिं जेतुं तर्तुं वा शक्नुयात्। अत एवार्जुनस्य मनोचिकित्सा करोत्ययं युगपुरुषः।

अत्रावसरे पूर्वं अर्जुनस्य प्रथमाध्यायस्य का स्थितिः का मनोदशा का मनोरुग्णता के मनोरोगाः तद् विवर्ण्यंते। अस्मात् कारणादेवाध्यायस्य नाम अर्जुनविषादयोगः। प्रथमाध्यायस्य विभाजने चत्वारि सोपानानि सन्ति।

(१) १ तः ११ श्लोकाः द्वयोः सेनयोः प्रधानशूरवीराणां गणना सामर्थ्यकथनञ्च।
(२) १२ तः १९ द्वयोः सेनयोः शङ्खध्वनिकथनम्।
(३) २० तः २७ अर्जुनद्वारा सेनानिरीक्षणप्रसङ्गः।
(४) २८ तः ४७ मोहेन व्याप्तस्यार्जुनस्य का पुरुषता, स्नेहशोकयुक्तवचनानि।

आदौ शूरसामर्थ्यं विदित्वा शङ्खध्वनिं श्रुत्वा अर्जुनेन सेनानिरीक्षिणं कृतं तावद् नास्त्यर्जुनस्य मनोरूग्णता किन्तु निरीक्षणे काले स्वजानन् दृष्ट्वा अर्जुनः विषादग्रस्तः जातः। अस्माकमपि संसारकुरुक्षेत्रे युद्धस्यावसरः समुत्पन्नः भवति तदानींमात्तजनात्री निरीक्ष्य विचलिताः भवेम। अर्जुनास्मासु एकैव भेदः तस्य सविधे श्रीकृष्णः आसीदस्माकं सविधे श्रीकृष्णस्य सामीप्यं सान्निध्यं न भवति अपि तु गीता एवं अर्जुनस्यानुभवाः श्रीकृष्णेन प्रदत्तानि समाधानवचनानि तु भवन्त्येव। सेनां निरीक्ष्य मोहग्रस्तार्जुनः स्नेहशोकयुक्तवचनान्यवदत्। स्नेहशोकयोः समाहारः यदा भवति तदा

(१०) एकादशेऽध्याये विश्वरूपदर्शनं कारयित्वा तदर्थं दिव्यचक्षू दत्वा मनोवैज्ञानिकं समाधानं करोति तथा च निमित्तमात्रं भव सव्यसाचिन् इति दशमं समाधानमयच्छत्।

(११) भक्तियोगे द्वादशेऽध्याये भक्तिरपि एकं मनोवैज्ञानिकं समाधानं तत्रापि त्यागात् शान्तिः जायते तेन त्यक्तेन भुञ्जिथा तत् एकादशतमं समाधानम्।

(१२) त्रयोदशेऽध्याये पुनः साङ्ख्यशास्त्रं साङ्ख्यं नाम ज्ञानं निरूप्य विज्ञानं प्रतिपादितं क्षेत्रं क्षेत्रज्ञं यः जानाति तस्य मनोवैज्ञानिकं समाधानं द्वादशतमे क्रमेण भवति।

(१३) चतुर्दशेऽध्याये गुणातीतेनैकेन शब्देन त्रयोदशतमं समाधानं प्रदत्तम्।

(१४) पञ्चदशेऽध्याये पुरुषोत्तमः स्वयं एकं समाधानं तथापि असङ्गशस्त्रेण दृढेन छित्वा, तथा च निर्मानमोहाजितसङ्गदोषा . . . . । (१५-३/५)

(१५) षोडशेऽध्याये दैवी सम्पुत्सु आसुरीसम्पत्सु को भेदः तेन एकं समाधानं कारितं यत् पञ्चदशतमं समाधानम्।

(१६) सप्तदशेऽध्याये श्रद्धा एकं समाधानं यत्र यज्ञ-दान-पतः आहरः सर्वं त्रिविधं यैः षोडशतमं समाधानं प्रदत्तम्।

(१७) अष्टादशेऽध्याये विषादग्रस्तः प्रथमाध्यायस्यार्जुनः अन्तिमेऽध्याये प्रसादप्राप्तः भवति नष्टो मोहः स्मृतिर्लब्धा . . . . (१८-७३) मोहेन नष्टेनापि मनोवैज्ञानिकं समाधानं भवति। अर्थात् मोहनाशोऽपि समाधानं तत् सप्तदशतमं समाधानम्।

यत्र योगेश्वरः कृष्णः भवति यत्र पार्थः भवति तत्र विजयः श्रीः नीतिश्च यत्र ध्रुवा भवति तत्र सर्वप्रकारकाणि समाधानानि स्वतैव भवन्ति।

प्राचीनभारते मनोविज्ञानमिति नाम्ना न कोऽपि ग्रन्थः तेन नाम्ना शाखापि नोपलभ्यते तथापि अस्माकं शास्त्राणि रामायणमहाभारतादीनि पुराणानि च मनोवैज्ञानिकदृष्ट्यापि अद्य जीवन्ति तत्र कारणमेकमेवास्ति यत् सर्वविधमनोदशानां समाधानं वैज्ञानिकपद्धत्या पूर्वसूरिभिः प्रदत्तं विद्यते। अत एव-

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ (१६-२४)**

अन्ते युद्धभूमौ एकमेव समाधानं देशकालधर्मानुसारमर्जुनाय आसीद् यत्- 'કહો પાર્થને ચડાવે બાણ, હવે તો યુદ્ધ એ જ કલ્યાણ'

**॥ सन्दर्भग्रन्थाः ॥**

(१) श्रीमद्भगवद्गीता-मूलमात्रम्
(२) परमात्मा विज्ञानमय है (राजस्थानप्रकाशन) अजमेर
(३) गीताप्रवचन, विनोबा भावे
(४) यथार्थगीता-स्वामी अडगडानन्दजी
(५) गीताप्रवचन-ओशो
(६) श्रीमद्भगवद्गीता, श्रीलप्रभुपाद, इस्कोन



Scanned with CamScanner